**दिनाङ्क : 20/10/2024** **सायम् : 06:20**

**आदौ-मुख्यवार्ताः**

- **प्रधानमन्त्री नरेन्द्रमोदी अद्य सबलं प्रतिपादितवान् यत् देशे स्वास्थ्यसेवानां मूलसंरचनानां सुदृढीकरणाय आगामिषु पञ्चषु वर्षेषु पञ्चसप्तत्यधिकसहस्राधिकानां चिकित्सालयानां योजनं भविष्यति।**
- **जम्मूकश्मीरस्य बारामूला जनपदे सैन्यबलानाम् आतंकिनां च मध्ये संघर्षः प्रचलति।**
- **भारतीय ऋतुविज्ञानविभागेन आगामि दिवसत्रयं तमिलनाडु, पुडुचेरी, कराईकल, केरल, दक्षिण कर्नाटक चेत्येषु राज्येषु महती वृष्टेः संभावना प्रकटिता ।**
- **गजा-देशस्य उत्तरभागे बेत्-लाहिया-नगरे इजरायल्-देशेन विहिते आक्रमणे सप्त्यधिकाः जनाः मृताः।**
- **भारत-न्यूजीलैण्डदेशयोः क्रिकेट्-निकष-शृङ्खलायाः प्रथमा-स्पर्धा न्यूजीलैण्ड-दलेन विजिता।**

**अथ वार्ताः**

**प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी अद्य सबलं प्रतिपादितवान् यत् विगतदशवर्षेषु देशस्य स्वास्थ्यसेवाक्षेत्रे परिवर्तनानि जातानि। सः न केवलं पूर्वांचले अपितु सम्पूर्णे देशे प्रमुखस्वास्थ्यसेवाकेन्द्रत्वेन काशीनगरस्य वर्धमानं प्रतिष्ठां प्रकाशितवान्। श्री मोदी स्वसंसदीयक्षेत्रस्य वाराणसीनगरे राजशंकरनेत्रचिकित्सालये उद्घाटनानन्तरं वदति स्म। असौ घोषितवान् यत् देशे स्वास्थ्यसेवानां मूलसंरचनानां सुदृढीकरणाय आगामिषु पञ्चषु वर्षेषु पञ्चसप्तत्यधिकसहस्राधिकानां चिकित्सालयानां योजनं भविष्यति। श्री मोदी केन्द्र प्रशासनस्य स्वास्थ्यसेवामालक्ष्य विविधाः उपक्रमाः सूचीकृताः, येषु जनानां कृते अल्पमूल्येषु चिकित्साः प्रदास्यन्ति। सः विगतदशवर्षेषु पूर्वाञ्चलनगरे पञ्चपञ्चाशदधिकानां आयुष्मान-आरोग्य-मन्दिराणां स्थापनायाः उल्लेखं कृतवान्, येन औषधयः अल्पमूल्येषु जनैः प्राप्तवन्तः। प्रधानमन्त्री मिशन इन्द्रधनुषस्य सफलतां प्रकाशितवान् यत् कोटि कोटिगर्भिणीनां नवजातानां च टीकाकरणं कृत्वा जीवनरक्षणे साहाय्यं कृतवान्। तमिलनाडुः कांची कामकोटी पीठस्य जगद्गुरु श्री शंकर विजयेन्द्र सरस्वती महाभागस्य उपस्थितौ

चिकित्सालयस्य उद्घाटनं विहितम्। भारतस्य प्रमुखेषु नेत्रसेवाप्रदातृषु अन्यतमः शङ्करनेत्रालयः निवेशकः राकेशझुन्झुनवालापरिवारस्य, अमेरिकादेशस्य शङ्करनेत्रप्रतिष्ठानस्य च सहकारेण अयं चिकित्सालयः स्थापितः अस्ति। प्रधानमन्त्री आशां प्रकटितवान् यत् नूतनेन नेत्रचिकित्सालयेन वृद्धानां बालकानां च लाभः भविष्यति, अपि च शंकराचार्यः शङ्करन्यासः च बिहारे अन्यत् केन्द्रं उद्घाटयितुं विचारयितुं आग्रहं कृतवान्। श्री शंकर विजयेन्द्र सरस्वती प्रधानमंत्री नरेन्द्र मोदिनः विकास प्रयासानां प्रशंसां विहितवान्।

**बारामूला-जनपद**

जम्मूकश्मीरस्य बारामूला जनपदे सैन्यबलानाम् आतंकिनां च मध्ये संघर्ष: प्रचलति। सामाजिक-संचार-माध्यमस्य अनुसारं जम्मू-कश्मीर-आरक्षि बलेन, सैन्यबलेन च संयुक्ताभियानं प्रचाल्य अयं संघर्ष विहित:। अंतिम विवरणं प्राप्तं यावत् संघर्ष: प्रचलति। विस्तृत विवरणस्य प्रतीक्षा अस्ति।

**भारतीय ऋतुविज्ञानविभाग**

भारतीय ऋतुविज्ञानविभागेन आगामि दिवसत्रयं तमिलनाडु, पुडुचेरी, कराईकल, केरल, दक्षिण कर्नाटक चेत्येषु राज्येषु महती वृष्टेः संभावना प्रकटिता ।

**राष्ट्रपतिः द्रौपदी मुर्मूः**

राष्ट्रपतिः द्रौपदी मुर्मूः मंगलवासरे नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्र-तम वर्षस्य राष्ट्रियजलपुरस्कारान् प्रदास्यति। केन्द्रीयजलशक्तिमन्त्रालयेन नववर्गेषु अष्टत्रिंशत् विजेतारः घोषिताः आसन्। एतेषु पुरस्कारेषु सर्वश्रेष्ठ-राज्यं सर्वश्रेष्ठ-जनपदं , सर्वश्रेष्ठ-ग्राम पंचायतम् , सर्वश्रेष्ठ-नगर-स्थानीय-निकायः, सर्वश्रेष्ठ जल उपयोगकर्ता संघः, सर्वश्रेष्ठ-नागरिकः चेति श्रेण्यः सन्ति। ओडिशा सर्वोत्तमराज्यवर्गे प्रथमस्थानं प्राप्तवान्। उत्तरप्रदेश-द्वितीयस्थाने, गुजरातपुडुचेरी च संयुक्तरूपेण तृतीयस्थाने वर्तते। प्रत्येकं पुरस्कारविजेतारं प्रशस्तिपत्रं पदकं च समेत्य धनराशिः अपि

पुरस्कारत्वेन प्रदास्यते। जलप्रबन्धनस्य जलसंरक्षणस्य च विषये जागरूकतां जनयितुं सर्वकारः राष्ट्रियस्तरस्य विशालं अभियानं चालयति। राष्ट्रीयजलपुरस्कारेषु देशस्य सर्वेभ्यः व्यक्तिभ्यः संस्थाभ्यः च चयनं भवति ये जलसमृद्धस्य भारतस्य सर्वकारस्य लक्ष्यं प्राप्तुं कार्यं कुर्वन्ति, प्रयत्नाः च कुर्वन्ति।

**विरामः**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

**गजा-इस्राइल**

गजा-देशस्य उत्तरभागे बेत्-लाहिया-नगरे इजरायल्-देशेन विहिते आक्रमणे सप्त्यधिकाः जनाः मृताः। बहवः जनाः व्रणिताः च सन्ति। तत्र सहाय्योद्धार कार्यं प्रचलति। मृतकानां संख्या अपि वर्धते इति सम्भाव्यते। इजरायलसेनायाः आक्रमणेन गजादेशस्य उत्तरभागे विगत षोडश दिवसेभ्यः गभीरा स्थितिः मानवीयसंकटः च उत्पन्ने।

**राष्ट्रीय जनता दलम्**

राष्ट्रीय जनता दलेन इण्डिया संयुतौ आसन-विभाजनम् उद्दिश्य अद्य असहमतिः प्रकटिता। दलस्य वरिष्ठो नेता मनोज कुमार झा अवोचत् यत् आसन-विभाजनात् पूर्वं आर.जे.डी.दलात् परामर्शः नैव कृतः। तत्रैव राज्यस्य प्राक्तन् कांग्रेस-प्रमुखः राजेशठाकुरः आर.जे.डी. दलस्य आरोपान् निराकृतवान्। तेनोक्तं यत् इण्डिया-संयुत्याः समेभ्यः सहयोगिभ्यः आसन-विभाजनात् पूर्वं विचार-विमर्शः विहितः। इंडिया संयुत्यः सप्ततिः आसनानि झारखंड मुक्ति मोर्चा दलाय, कांग्रेस दलाय च दत्तानि। तत्रैव एकादश आसनानि राष्ट्रीय जनता दलाय, मार्क्सवादी लेनिन दलाय, सी पी आई एम एल दलाय च दत्तानि।

**मनसुखमाण्डविया**

केन्द्रीय-युव-प्रकरण-क्रीडामन्त्री डॉ. मनसुखमाण्डविया अद्य उक्तवान् यत् क्रीडाक्षेत्रे केन्द्रसर्वकारेण भारतं विश्वस्य उत्तम-प्रदर्शन-कर्तृ-देशेषु शीर्ष-दश-स्थानन्तर्गतम् आनेतुं लक्ष्यं निर्धारितमस्ति। सः तिरुवनन्त-पुरमस्य कौडियार्-नगरे आयोजितस्य भारतीयक्रीडाप्राधिकरणस्य गोल्फ-क्रीडाङ्गणस्य उद्घाटनसमारोहं सम्बोधितवान्। सः अवदत् यत् भारते गोल्फक्रीडायाः महती सम्भावना वर्तते। असौ प्रोक्तवान् यत् सप्त-चत्वारिंशदधिक-द्विसहस्र-तम-वर्षपर्यन्तं भारतं विकसितराष्ट्रं कर्तुम् अस्य देशस्य प्रत्येकं नागरिकस्य सुस्वास्थ्यं भवितुमर्हति। डॉ. माण्डविया अवदत् यत् एतत् लक्ष्य-प्राप्तये अस्माकं समाजस्य शारीरिकं, मानसिकं, सांस्कृतिकं च स्वास्थ्यं बहु महत्त्वपूर्णम् अस्ति। अवसरेस्मिन् केन्द्रीय राज्यमन्त्री सुरेश गोपी, प्रदेश-मुख्य-सचिवः साराधा मुरलीधरनः अन्ये च गणमान्यजनाः उपस्थिताः आसन् ।

**राजस्थान-दुर्घटना**

प्रधानमन्त्रिणा नरेन्द्र-मोदिना राजस्थानस्य धौलपुरे दुरापादितायां मार्गदुर्घटनायां जनानां मृत्यु-प्रकरणे दुःखं प्रकटितम्। सामाजिक-सञ्चार-पटले श्रीमोदिनोक्तं यत् राज्य-सर्वकारस्य निरीक्षणे स्थानीय-प्रशासनं पीडितानां सर्वसम्भव-साहाय्यं सन्नद्धं वर्तते। अमुना समेषां व्रणितानां शीघ्र-स्वस्थलाभस्य कामना कृता। प्रधानमन्त्रिणा घोषितं यत् प्रधानमन्त्रि-राष्ट्रिय-कोषात् प्रत्येकं मृतकस्य परिजनेभ्यः द्विलक्ष-रूप्यकाणां प्रत्येकं व्रणितेभ्यश्च पञ्चाशत्-सहस्र-रूप्यकाणि अनुग्रह-राशित्वेन प्रदास्यन्ते।

**प्रबोवो सुबियान्तो**

प्रबोवो सुबियान्तो अद्य इंडोनेशियादेशस्य राष्ट्रपतिपदं स्वीकृतवान्। त्रिसप्ततिः वर्षीयः प्रबोवो-महोदयः औपचारिकरूपेण विश्वस्य सर्वाधिकजनसंख्यायुतस्य मुस्लिमदेशस्य अष्टमः राष्ट्रपतिः जातः। फेब्रुवरी मासस्य चतुर्दशे दिनाङ्के सञ्जाते निर्वाचने भूतपूर्वसेनापतिः प्रबोवो सुबियान्तो प्रायः षष्टिः प्रतिशतमितं मतं प्राप्तवान् ।

**दिल्ली हाफ् मैराथन्**

दिल्ली हाफ् मैराथन् इत्यस्मिन् युगाण्डादेशस्य ओलम्पिकविजेता जोशुआ चेप्टेगेई पुरुषवर्गे, इथियोपियादेशस्य एलेमडिस इयायुः महिलावर्गे च विजितवन्तौ। नव दिल्ल्याः जवाहरलालनेहरू-क्रीडाङ्गणात् आरब्धा मैराथन-इति स्पर्धा संसदमार्गतः क्रीडाङ्गणस्य परिसरात् बहिः सम्पन्ना जाता। भारतीयनौसेनाप्रमुखः एड्मिरल् दिनेश के त्रिपाठी वार्ताहरैः उक्तवान् यत् मैराथन इत्यस्य वातावरणम् अतीव ऊर्जावान् आसीत्। एतत् फिट् इण्डिया-आन्दोलनस्य सम्यक् उदाहरणम् अस्ति।

**महिला क्रिकेट्**

महिलानां विंशतिं प्रतिविंशतिः विश्व-चषक-क्रिकेट्स्पर्धायाः निर्णायक-द्वन्द्वे अद्य दुबई नगरे न्यूजीलैण्ड-दलं दक्षिण अफ्रीका-वृन्दं सम्मुखीकरिष्यति। भारतीय-समयानुसारेण इयं स्पर्धा सायं सार्ध-सप्त-वादने आरप्स्यते।

**क्रिकेट्**

भारत-न्यूजीलैण्डदेशयोः क्रिकेट्-निकष-शृङ्खलायाः प्रथमा-स्पर्धा न्यूजीलैण्ड-दलेन विजिता। भद्रप्रदर्शनाय न्यूजीलैण्डस्य रचिन-रविन्द्रः स्पर्धा पुरुष-रूपेण पुरस्कृतः। शृङ्खलायाः द्वितीया स्पर्धा गुरुवासरात् मुम्बई नगरे आरप्स्यते।

।।इति वार्ताः।।